प्रथमसत्रार्द्धम्

पंचमपत्रम्

साहित्यम्

पूर्णाङ्का: 80

समय: घण्टात्रयम्

(15×2=30)

अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।

1. विश्वनाथ: मङ्गलश्लोके कान् कान् अर्थान् प्रकाशयतु इति देवीं प्रार्थयते।

2. किं स्वर्गे लोके कामधुक् भवति?

3. शब्दमूर्तिधरस्य विष्णो: अंशा: के?

अथवा

मम्मटस्य काव्यलक्षणं किम्?

4. ध्वन्यात्मनि शृङ्गारे के हेया:?

5. चतुर्वर्गफलप्राप्ति: इत्यत्र चत्वार: वर्गा: के?

अथवा

साधुकाव्यनिषेवणं किं किं करोति?

6. काव्यात् मोक्षप्राप्ति: कथं भवति?

7. किं किं लोके दुर्लभम्?

8. य: कौमारहर इत्यत्र क अलंकार: स्फुट:?

अथवा

य: कौमारहर इत्यत्र मम्मटमते कौ अलंकारौ अस्फुटौ?

9. काव्यगुणा: कस्य धर्मा:?

10. शून्यं वासगृहम् इत्यादिपद्ये क: रस:?

अथवा

क: अर्थ काव्यात्मेति व्यवस्थित:?

11. का रतिः भाव इत्युच्यते ?

अथवा

विश्वनाथस्य मते पुनरुक्तवदाभासः कीदृशः ?

12. भाषासमालंकारस्य उदाहरणं किम् ?

13. वृत्यनुप्रासस्य लक्षणं लिखत।

14. लिङ्गश्लेषस्य उदाहरणं किम् ?

15. शब्दश्लेषः कतिविधः ? के ते ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** (5×6=30)

16. मङ्गलश्लोकः व्याख्यायताम्।

17. चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि काव्यादेव यतः – व्याख्यात।

अथवा

काव्यप्रयोजने प्राचीनानां मतं प्रतिपादयत।

18. मम्मटस्य काव्यलक्षणे 'सगुणौ' इति दलं दूषयत।

अथवा

"उत्कर्षहेतवः प्रोक्ताः गुणालंकाररीतयः" व्याख्यात।

19. यथेच्छं चत्वारः शब्दश्लेषाः सोदाहरणं निरूप्यन्ताम्।

अथवा

पुनरुक्तवदाभासालंकारस्य लक्षणं व्याख्याय भुजङ्गकुण्डलीत्यत्र समन्वयो विधीयताम्।

20. लाटानुप्रासस्य लक्षणं प्रतिपाद्य उदाहरणे समन्वयो विधेयः।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** (1×20=20)

21. पञ्चानुप्रासान् सलक्षणं सोदाहरणं प्रतिपादयत।

अथवा

विश्वनाथस्य परिचयः दीयताम्।

अथवा

प्रथमपरिच्छेदस्य परिचयः दीयताम्।